स तं बाहुमशक्तो वै खादितुं भेत्तुमेव वा। दशनैर्मूलनिर्मुक्तैः सफेनं रुधिरं वमन्। विपाटिताभ्यामोष्ठाभ्यां कटाभ्यां विदलीकृतः। अक्षिणी विकृते चक्रे विसृते मुक्तबन्धने। निरस्तहनुराविष्टः शोणिताक्तविलोचनः। उत्कर्णो नष्टचेतास्तु स केशी बह्वचेष्टत। उत्पतन्नसकृत् पादैः शकृन्मूत्रं समुत्सृजन्। खिन्नार्द्ररोमा श्रान्तस्तु निर्यत्नचरणोऽभवत्। केशिवक्त्रविलग्नस्तु कृष्णबाहुरशोभत। व्याभुग्न इव घर्मान्ते चन्द्रार्द्धकिरणैर्घनः। केशी च कृष्णसंसक्तः श्रान्तगात्रो व्यरोचत। प्रभातावनतश्चन्द्रः श्रान्तो मेरुमिवाश्रितः। तस्य कृष्णभुजोद्धूताः केशिनो दशना मुखात्। पेतुः शरदि निस्तोयाः सिताभ्रावयवा इव। स तु केशी भृशं श्रान्तः कृष्णेनाक्लिष्टकर्मणा। स्वभुजं स्वायतं कृत्वा पाटितो बलवत्तदा। स पाटितो भुजेनाजौ कृष्णेन विकृताननः। केशी नदन्महानादं दानवो व्यथितस्तदा। विघूर्णमानः स्रस्ताङ्गो मुखाद्रुधिरमुद्वमन्। भृशं व्यङ्गीकृतवपुर्निकृत्ताद्रिरिवाचलः। व्यादितास्यो महारौद्रः सोऽसुरः कृष्णबाहुना। निपपात यथा कृत्तो नागो द्विविदलीकृतः। बाहुना कृत्तदेहस्य केशिनो रूपमाबभौ। पशोरिव महाघोरं निहतस्य पिनाकिना। द्विपादपृष्ठपुच्छार्द्धे श्रवणैकाक्षिनासिके। केशिनस्ते द्विधा भूते द्वे त्वर्द्धे रेजतुः क्षितौ। केशिदन्तक्षतस्यापि कृष्णस्य शुशुभे भुजः। क्रमस्ताल इवारण्ये गजेन्द्रदशनाङ्कितः। तं हत्वा केशिनं युद्धे कल्पयित्वा च भागशः। कृष्णः पद्मपलाशाक्षो हसंस्तत्रैव तस्थिवान्। तं हतं केशिनं दृष्ट्वा गोपा गोपस्त्रियस्तथा। बभूवुर्मुदिताः सर्वे हतविघ्ना हतक्लमाः। दामोदरन्तु श्रीमन्तं यथास्थानं यथावयः। अरक्षनन्दन् प्रियैर्वाक्यैःपूजयन्तः पुनः पुनः" "वैशम्पायन उवाच अथाहान्तर्हितो विप्रो नारदः खगमो मुनिः। प्रीतोऽस्मि विष्णो! देवेति कृष्ण! कृष्णेति चाब्रवीत्। यदिदं दुष्करं कर्म्म कृतं केशिजिघांसया। त्वय्येव केवलं युक्तं त्रिदिवे त्र्यम्बकेऽपि वा। अहं त्वनेन गोविन्द! कर्म्मणा परितोषितः। हयाद्स्माम्महेन्द्रोऽपि बिभेति बलसूदनः। कुर्वाणस्य वपुर्घोरं केशिनो दुष्टचेतसः। यत्त्वया पाटितं देहं भुजेनायतपर्वणा। एषोऽस्य मृत्युरन्ताय विहितो विश्वयोनिना। यस्मात्त्वया हतः केशी तस्मान्मच्छासनं शृणु। केशवो नाम तस्मात् त्वं ख्यातिं लोके गमिष्यसि"। केशिहन् इत्यादयोऽप्यत्र। "त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः" विष्णुस०। "प्रकाशनात् केशाः रश्मयस्ततः अस्त्यर्थे इनि। ५परमेश्वरे ६सूर्य्यादित्रये च। "केशी केशा रश्मयस्तद्वान् भवति काशनाद्वा प्रकाशनाद्वेति" १२।२६। निरु० निरुचत्र "केश्यग्निं केशी विषं केशी बिभर्त्ति रोदसी। केशी विश्वं स्वर्दृशे केशीदं ज्योतिरुच्यते" ऋ० १०।१३६। ऋचमुदाहृत्य व्याकृतं यथा "केशी अग्निञ्च विषञ्च विषमित्युदकनाम विष्णातेः विपूर्व्वस्य स्नातेः शुद्ध्यर्थस्य विपूर्व्वस्य वा सचतेः। द्यावापृथिव्यौ धारयति केशीदं सर्वमिदमभिरोहति केशीदं ज्योतिरुच्यते इत्यादित्यमाह अथाप्येते इतरे ज्योतिषी केशिनी उच्येते धूमेनाग्निः रजसा च मध्यमः" इत्युक्ता च तेषामेषा साधारणाभवतीत्युक्ता च। "त्रयः केशिन ऋतुथा विचक्षते संवत्सरे वपत एकएषाम्। विश्वमेको अभिचष्टे शचीभिर्ध्राजिरेकस्य ददृशे न रूपम्" ऋ० १।१६४।४४। ऋगुदाहृता। व्याख्याता चैषा भाष्ये

"केशस्थानीयप्रकृष्टरश्मियुक्तास्त्रयोऽग्न्यादित्यवायवः ते च ऋतुथा काले काले विचक्षते विविधलक्षणां भूमिं पश्यन्ति तेषां पृथक् पृथक् कार्य्यमाह एषां मध्य एकोऽग्निः संवत्सरेऽतीते सति संवत्सरं वपते दाहेन केशस्थानीयोषधिवनस्पत्यादिकच्छेदनेन नापितकार्य्यं करोति एकः अन्यः आदित्यो विश्वं सर्वं जगत् शचीभिः स्वकीयैः प्रकाशवृष्ट्यादिकर्मभिरभिचष्टे सर्वतः पश्यति एकस्य वायोर्ध्राजिर्गतिर्ददृशे दृश्यते सर्वैः न रूपं अप्रत्यक्षत्वात् स्पर्शशब्दधृतिकम्पलिङ्गैर्गम्यत इति हि न्यायविदोवदन्ति" भा०

**केशिनी** स्त्री केशाः तदाकारा जटाः सन्त्यस्य इनि ङीप्। १जटामांस्यां राजनि० २चोरपुष्पीवृक्षे (चोरकाँचकी) अमरः। ३प्रशस्तकेशयुक्तायां स्त्रियां, दमन्दूपनलं प्रति दमयन्तीप्रेरिते ४तद्दूतीभेदे "गच्छ केशिनि। जानीहि" "एवमुक्तास्य केशिन्या नलस्य कुरुनन्दन!"। "ततः सा केशिनी गत्वा दमयन्त्यै न्यवेदयत्" इति च भा० व०७४अ०। कश्यपपत्नीप्रधायाः ५कन्यारूपे अपसरोभेदे। "प्रधाऽसूत महाभागा देवी देवर्षितः पुरा" इत्युपक्रमे "केशिनी च सुबाहुश्च सुरता सुरजा तथा" भा० आ०६५अ०। ६पार्व्वतीसहचरीभेदे "गौरी विद्याऽथ गान्धारी केशिनी मित्रसाह्वया। सावित्र्या सह सर्व्वास्ताः पार्व्वत्या यान्ति पृष्ठतः" भा० व० २३०अ०